# आदर्शप्रश्नपत्रम् 1 (2006)
## संस्कृतम् (केन्द्रिकम)
## द्वादश–कक्षा

**अवधि :** होरात्रयम् — पूर्णांका : 100
**समय :** तीन घण्टे — पूरे अंक : 100
**Time :** 3 hours — **Total Marks :** 100

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
इस प्रश्नपत्र के चार खण्ड हैं।
The question paper has four sections.

| | | |
|---|---|---|
| खण्ड : 'क' अपठितांश–अवबोधनम् | | 10 अंकाः |
| Section 'A' : Reading Comprehension | | |
| खण्ड : 'ख' रचनात्मककार्यम् | | 15 अंकाः |
| Section 'B' : Writing Skill | | |
| खण्ड : 'ग' अनुप्रयुक्तव्याकरणम् | | 30 अंकाः |
| Section 'C' : Applied Grammar | | |
| खण्ड : 'घ' | (i) पठितांश–अवबोधनम् | 35 अंकाः |
| Section D : | Text Book | |
| | (ii) सामान्य संस्कृतसाहित्यपरिचयः | 10 अंकाः |
| | General introduction of Sanskrit literature | |

निर्देशाः
**Instructions**

1. उत्तराणि उत्तरपुस्तिकायाम् एव लेखनीयानि।
   Please write the answers in the answersheet only.
2. सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि।
   Answer all the questions in Sanskrit only.

# आदर्शप्रश्नपत्रम् 1 (2006)

## खण्डः 'क' Section 'A'

**10**

## अपठितांश–अवबोधनम्

## (Reading Comprehension)
## (Unseen)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत

**नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए**

**Read the following passage and answer the questions in the answersheet.**

इह संसारे सर्वेषु वस्तुषु समयः अधिकं मूल्यवत् वस्तु वर्तते। अन्यवस्तूनि विनष्टानि पुनरपि लब्धुं शक्यन्ते परं समयः विनष्टः केनापि उपायेन पुनः प्राप्तुं न शक्यते। यस्य आयुषः यावान् अंशः निरर्थकं गतः स गतः एव। अतः तथा प्रयतितव्यं यथा एकस्यापि क्षणस्य दुरुपयोगः न स्यात्। समस्तः एव समयः समुचितरूपेण व्यतीतः भवेत्। समयः कस्यापि प्रतीक्षां न करोति। अनेके जनाः द्यूते, विवादे, वृथाभ्रमणे, पिशुनतायां, निद्रायां च समस्तं समयं नयन्ति। ते निजजीवनस्य बहुमूल्यम् अंशं वृथा यापयन्ति। समयस्य सदुपयोगः जीवनसफलतायाः प्रथमसोपानम्, समुन्नतेः च मूलमन्त्रम् अस्ति। प्रकृतिः अपि समयस्य सदुपयोगमेव शिक्षयति। ये जनाः समयस्य दुरुपयोगं न कुर्वन्ति ते सदा सुखेनैव तिष्ठन्ति। अतः आलस्यं विहाय सर्वदैव समयस्य सदुपयोगः कर्त्तव्यः।

**I.** एकपदेन उत्तरत **½ × 4 = 2**

एक शब्द में उत्तर लिखिए

**Answer in one word only.**

(i) संसारे सर्वाधिकं मूल्यवत् वस्तु किम् अस्ति ?

(ii) समस्तः समयः कथं व्यतीतः भवेत् ?

(iii) समयस्य सदुपयोगः कस्याः मूलमन्त्रम् अस्ति ?

(v) किं विहाय समयस्य सदुपयोगः कर्तव्यः ?

**II.** पूर्णवाक्येन उत्तरत **2 × 1 = 2**

पूरे वाक्य में उत्तर दीजिए

**Answer in a complete sentence**

(i) अनेके जनाः कथं समस्तं समयं नयन्ति ?

(ii) कीदृशाः जनाः सदा सुखेनैव तिष्ठन्ति ?

**III.** 'स गतः एव' अत्र 'स' इति सर्वनामपदं कस्य कृते प्रयुक्तम् अस्ति ? **1**

**IV.** निर्देशानुसारम् उत्तरत **1 ×3 = 3**

निर्देश के अनुसार उत्तर दीजिए

**Do as directed**

(i) स्यात् इति क्रियापदस्य किं कर्तृपदम् ?

(ii) 'व्यर्थम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(iii) 'सदुपयोगः' इत्यस्य विपरीतार्थकं पदं किं प्रयुक्तम् ?

**V.** अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। **2**

इस गद्यांश का उचित शीर्षक लिखिए।

**Write an appropriate title for this passage.**

## खण्डः 'ख' Section 'B'

## संस्कृतेन रचनात्मककार्यम् 15

## Writing Skill in Sanskrit

3. भवान् शुभेन्दुः मुम्बईनगरे निवसति। तव मित्रम् श्रवणः परीक्षायाम् उत्तमांकैः उत्तीर्णः। परीक्षायां सफलतायै वर्धापनं दातुं मित्रं प्रति लिखिते अस्मिन् पत्रे उचितपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पत्रं पुनः लिखत।

आप, शुभेन्दु मुम्बई में रहते हैं। आपका मित्र श्रवण परीक्षा में अच्छे अंक लेकर उत्तीर्ण हुआ है। परीक्षा में सफलता के लिए बधाई हेतु मित्र के प्रति लिखे गए इस पत्र में उचित पदों से खाली स्थान भर कर पत्र पुनः उत्तरपुस्तिका में लिखें।

**You are Shubhendu and live in Mumbai. Your friend Shravan has passed with good marks in the examination. Fill in the blanks in the following letter written to your friend congratulating him on his success in the examination.**

**½ × 10 = 5**

(i)————————

प्रिय मित्र (ii) ————————! तिथिः——————

(iii) ————————!

अत्र कुशलं तत्रास्तु। अद्यैव द्वादशकक्षायाः (iv) ——————— केन्द्रीय–माध्यमिक–शिक्षा–संघटनेन समुद्घोषितः। मया 'इण्टरनेट' इति माध्यमेन तव परीक्षापरिणामः (v) ——————। अस्यां परीक्षायाम् त्वम् पञ्चनवतिः प्रतिशतम् (vi) ———————— प्राप्य समुत्तीर्णः। संस्कृते तु शतम् एव अंकान् लब्धवान् असि। योग्यतासूच्याम् अपि तव नाम दृष्ट्वा अहम् हार्दिकं मोदम् अनुभवामि। (vii) —————— कठोरः परिश्रमः सफलः जातः। त्वया न केवलं (viii) ——————— अपि तु स्वकुटुम्बस्य अपि यशः वर्धितम्। प्रशंसनीयोऽसि त्वम्।

अहम् एतस्यै उच्चसफलतायै तुभ्यं हार्दिकम् (ix) ———————— यच्छामि। भविष्ये तव का योजना इति लिखतु।

मातृ–पितृचरणयोः प्रणामाः।

तव अभिन्नहृदयः

(x)————————

**मञ्जूषा**

| |
|---|
| श्रवण, परीक्षापरिणामः, मुम्बईतः, नमस्ते, अंकान्, विदितः, आत्मनः, तव, शुभेन्द्रः, वर्धापनम् |

3. **प्रदत्तशब्दसूचीसाहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत**

**मञ्जूषा में दिए गए शब्दों की सहायता से नीचे दी गई लघुकथा को भरकर उत्तर पुस्तिका में केवल उत्तर लिखें।**

**Please fill in the blanks in the following story and write only the answers on the answersheet. You may take the help of words given in the box. ½ × 10 = 5**

महाभारतयुद्धे समाप्ते धर्मराजः युधिष्ठिरः (i)———————— अभवत्। अथैकदा श्रीकृष्णस्य (ii)———————— सः स्वभ्रातृभिः द्रौपद्या च सह पितामहं भीष्मं द्रष्टुं (iii)———————— अगच्छत्। तत्र आसीत् शरशय्याम् (iv)————————पितामहः युधिष्ठिरः। तं धर्मोपदेशं दातुम् प्रार्थयत। भीष्मः धर्मोपदेशं करोति। तं श्रुत्वा सहसा द्रौपदी (v) ————————अहसत्। भीष्मः अपृच्छत्– ''पुत्रि! किम् ते हासकारणम्? निःसङ्कोचं वद।'' द्रौपदी (vi)————————अवदत् पूज्य पितामह! क्षम्यताम्, मम मनसि अयं विचारः उदितः यत् (vii)————————यदा अहं विवस्त्रताभयेन कातरं प्रार्थितवती तदा (viii)———————— उपदेशबुद्धिः कुत्र गता? पितामहः शान्त्या प्रत्युवाच– ''पुत्रि! दुर्योधनस्य अन्यायार्जितस्य अन्नस्य भक्षणेन मम बुद्धिः'' (ix)————————आसीत्। अतः तत्र धर्मनिरूपणे असमर्थः आसम्। अधुना अर्जुनस्य शरैः मम दूषितं रक्तं निर्गतम्। बुद्धिः (x)———————— जाता। तेनाहं धर्मस्य तत्त्वम् उपदिशामि।

**मञ्जूषा**

| |
|---|
| आदेशेन, अधिशयानः, सम्राट्, कुरुसभायाम्, उच्चैः, कलुषिता, युद्धभूमिम, सविनयम्, भवतः, विशुद्धा |

4. **अधोलिखितेषु एकं विषयम् अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदम् संस्कृतेन लिखत।**

**नीचे लिखे विषयों में से एक पर पांच वाक्यों का संस्कृत में एक अनुच्छेद लिखें।**

**Write a passage of five sentences in Sanskrit on any one of the following topics.**

विद्यालयस्य क्रीडोत्सवः, स्वतंत्रतादिवसः, परोपकारः **5**

## खण्डः 'ग' Section 'C'

## अनुप्रयुक्तव्याकरणम् 30

## (Applied Grammar)

5. अधोलिखितवाक्येषु स्थूलाक्षरपदानां सन्धिविच्छेदं कुरुत। **1 × 6 = 6**

नीचे लिखे वाक्यों में स्थूलाक्षरपदों में संधिविच्छेद करें।

**Disjoin Sandhis in the bold typed words in the following sentences:**

(i) येनाक्रमन्त्यृषयो **ह्याप्तकामाः**।

(ii) जीवत्यनाथोऽपि वने विसर्जितः **कृतप्रयत्नोऽपि** गृहे न जीवति।

(iii) **सदानुकूलेषु** हि कुर्वते रतिम्।

(iv) सद्विद्या यदि किं **धनैरपयशो** यद्यस्ति किं मृत्युना।

(v) तत्र तु एकं **शून्यञ्च** द्वे एव संख्ये महत्त्वपूर्णे।

(vi) किन्नु खलु अद्य प्रत्यूष एव **गेहान्निष्क्रान्तस्य** बुभुक्षया चञ्चलायेते इव मेऽक्षिणी।

6. अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां विग्रहाः लेखनीयाः। **1 × 6 = 6**

निम्नलिखित वाक्यों में मोटे अक्षरों में छपे पदों के विग्रह लिखिए।

**Disjoin compounds in the bold words in the following sentences.**

(i) अयमेव **अहोरात्रं** जनयति।

(ii) **सुगांगमार्गम्** आदेशय।

(iii) अहो **बहुमत्स्योऽयं** ह्रदः।

(iv) आचार्य! बौद्धानां **सामाजिकजीवनं** कीदृशम् ?

(v) वदनं प्रसादसदनं सदयं हृदयं **सुधामुचो** वाचः।

(vi) **सदानुकूलेषु** हि कुर्वते रतिम्।

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतं प्रकृतिं प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत

नीचे लिखे हुए वाक्यों में कोष्ठक के अन्तर्गत प्रकृति–प्रत्यय जोड़कर खाली स्थान में भरें।

**Rewrite the following sentences by adding suffixes to the roots and words given in the bracket.** **1 × 8 = 8**

(i) सत्येन पन्थाः ––––––––– देवयानः। (वि+तन्+क्त)

(ii) एनमेव ––––––––– भवति परमेष्ठिनः परार्द्धसंख्या। (आ+श्रि+ल्यप्)

(iii) देव। न अतः परं ––––––––– शक्यम्। (विज्ञा णिच् तुमुन्)

(iv) अत्र ––––––––– समिद्भिःअतिनमितः छदिप्रान्तः। (शुष्+कर्मणियक्+शानच्)

(v) वैहीनरे! तिष्ठ तिष्ठ। न –––––––––। (गम्+तव्यत्)

(vi) अशक्तैः ————— शत्रोः कर्तव्यं प्रपलायनम्। (बल+इन्)

(vii) मठानां ————— प्रेक्षकान् प्रसभम् आकर्षति। (विशाल+तल्)

(viii) ————— आर्यभट्टस्य महिमानं वयं जानीमः। (भग+वतुप् सम्बोधने)

8. **अधोलिखितेषु वाक्येषु कर्तृ–क्रियापदयोः अन्वितिः क्रियताम्।** **1 × 5 = 5**

**निम्नलिखित वाक्यों में कर्ता और क्रिया की अन्विति कीजिए।**

**Please fill up subject/verb in the following sentences.**

(i) वयं वर्तमानकाले सङ्गणकस्य प्रयोगं —————। (कुर्वन्ति / कुर्मः)

(ii) अन्यमन्यं निमन्त्रयतु —————। नाहं तावद् दरिद्रः। (त्वम् / भवान्)

(iii) किं यूयं प्रक्षेपकमाध्यमेन तत् सर्व यात्रावृत्तं द्रष्टुं —————। (वाञ्छथः / वाञ्छथ)

(iv) वैहीनरे! सुगाङ्गप्रासादस्य मार्गम् —————। (आदेशय / आदेशयत)

(v) आर्य! आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं ————— । (यच्छाति / यच्छ)

अथवा **(OR)**

अधोदत्तेषु वाक्येषु विशेष्यपदैः सह विशेषणपदानि योजयत।

अधोलिखित वाक्यों में विशेष्य पदों के साथ विशेषणपद जोड़ें।

Add the adjectives with nouns in the following sentences.

(विशेषणपदानि अधः मञ्जूषायां दत्तानि सन्ति)

तथाहि गोमयानाम् उपलभेदकम् ———— प्रस्तरखण्डम्,

इतः शिष्यैः ———— दर्भाणां स्तूपः, अत्र शुष्यमाणैः समिद्भिः——छदिप्रान्तः——भित्तयः। अतएव निस्स्पृहत्यागिभिः ———— जनैः राजा तृणवद् गण्यते।

(अतिनमितः, एतत्, जीर्णाः, एतादृशैः, आनीतानां)

9. **अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्त्तिः क्रियताम्–**

**नीचे लिखे वाक्यों में कोष्ठक में दिए गए शब्दों के साथ उपपदविभक्ति का प्रयोग करके खाली स्थान भरें।**

**Please fill in the blanks after using suitable upapadavibhakti with the words given in the brackets.** **1 × 5 = 5**

(i) कथं स्पर्धते ———— (अस्मद्) सह दुरात्मा राक्षसः।

(ii) राक्षस! राक्षस! विरम विरम ———— (दुर्व्यसन)

(iii) अलम् ————— (विनय)

(iv) न ————— (प्रयोजन) अन्तरा चाणक्यः स्वप्नेऽपि चेष्टते।

(v) आर्य वैहीनरे! ————— (वैतालिक) सुवर्णशतसहस्रं दापय।

# खण्डः 'घ' (Section 'D')

## भागः–1 (Part–1) 35

## पठितांश–अवबोधनम्

## (Comprehension of Read Text)

10.अ अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत।

निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर दें।

**Read the following passage and answer the given questions.**

कस्मिंश्चित् जलाशये अनागतविधाता प्रत्युत्पन्नमतिः यद्भविष्यश्च इति त्रयो मत्स्याःप्रतिवसन्ति स्म। अथ कदाचित् तं जलाशयं दृष्ट्वा गच्छद्भिः मत्स्यजीविभिःउक्तम्– ''अहो! बहुमत्स्योऽयं ह्रदः कदापि न अस्माभिः अन्वेषितः''। अद्य तु आहारवृत्तिः सञ्जाता। सन्ध्यासमयः अपि संवृत्तः। ततः प्रभाते अत्र आगन्तव्यम् इति निश्चयः।

**I.** एकपदेन उत्तरत **½ × 2 = 1**

एक पद में उत्तर लिखिए

**Answer in one word only.**

(i) जलाशये कति मत्स्याः प्रतिवसन्ति स्म।

(ii) ह्रदः कीदृशः आसीत् ?

**II.** पूर्णवाक्येन उत्तरत

पूर्ण वाक्य में उत्तर लिखिए

**Answer in a complete sentence** **1 × 2 = 2**

(i) मत्स्यजीविनः कदा आगन्तुं निश्चयम् अकुर्वन् ?

(ii) केषाम् आहारवृत्तिः सञ्जाता ?

**III.** (i) 'अस्माभिः' इति पदं केभ्यः प्रयुक्तम् ? **1 × 2 = 2**

(ii) 'गच्छद्भिः' इति पदं कस्य विशेषणम् ?

अथवा

(ii) 'आगतविधाता' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

10.आ अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत **5**

निम्नलिखित पद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर दें

**Read the following verse and answer the following questions.**

व्रजन्ति ते मूढधियः पराभवं,
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधा
नसंवृताङ्गान्निशिता इवेषवः।।

**I.** एकपदेन उत्तरत **½ × 2 = 1**

एक पद में उत्तर दीजिए

**Answer in one word only.**

(i) के अङ्गानि प्रविश्य घ्नन्ति ?

(ii) मन्दबुद्धिजनाः केषु मायिनः न भवन्ति ?

**II.** पूर्णवाक्येन उत्तरत **1 × 2 = 2**

पूर्ण वाक्य में उत्तर लिखिए

**Answer in a complete sentence**

(i) शठानां तुलना कैः सह कृता ?

(ii) मूर्खाः कं व्रजन्ति ?

**III.** (i) 'निशिताः' इति पदं कस्य विशेषणम् ? **1 × 2 = 2**

(ii) संवृत्ताङ्गान् इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?

10.इ अधोलिखितनाट्यांशं पठित्वा प्रश्नान् उत्तरत **5**

**निम्नलिखित नाट्यांश को पढ़कर प्रश्नों के उत्तर दें**

**Answer the following questions based on the following extract from a play.**

**A.** **सूत्रधारः** आर्ये! किम् अस्त्यस्माकं गेहे कोऽपि प्रातराशः ?

**नटी** अस्ति, घृतं, गुडो, दधि, तण्डुलाश्च सर्वमस्ति।

**सूत्रधारः** चिरं जीव, एवं शोभनानां भोजनानां दात्री भव।
आर्ये! किमेतत् सर्वम् अस्माकं गेहेऽस्ति ?

**नटी** नहि नहि अन्तरापणे।

**सूत्रधारः** (सरोषम्) आः अनार्ये! एवं ते आशा छिद्यताम्। अहं पर्वताद् दूरमारोप्य पातितोऽस्मि।

**नटी** मा बिभीहि, मा बिभीहि। मुहूर्तकं प्रतिपालयतु आर्यः। सर्वं सज्जं भविष्यति। अद्य ममोपवासः अस्ति। यदि आर्यस्यानुग्रहः स्यात् तर्हि अस्मादृशयोग्यं कञ्चिद् जनं निमन्त्रयितुम् इच्छामि।

**I.** एकपदेन उत्तरत **½ × 2 = 1**

एक पद में उत्तर दीजिए

**Answer in one word only.**

(i) नटी कं क्षणमात्रं प्रतीक्षां कर्तुं कथयति ?

(ii) दूरमाारोप्य कुतः सूत्रधारः पातितः इव ?

**II.** पूर्णवाक्येन उत्तरत **1 × 2 = 2**

पूर्ण वाक्य में उत्तर लिखिए

**Answer in a complete sentence**

(i) नटी कमपि किमर्थं निमन्त्रयितुम् इच्छति ?

(ii) नटी किं सज्जं कर्तुम् आश्वासयति ?

**III.** (i) 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ? **1 × 2 = 2**

(ii) 'कृपा' इति पदस्य किं समानार्थकपदम् अत्र प्रयुक्तम् ?

**B.** **अधोलिखितं कः कं कथयति ?** **1 × 4 = 4**

**निम्नलिखित कौन किसको कह रहा है ?**

**Who is saying the following to whom ?**

(i) प्रथमं राष्ट्रसंरक्षणम् ततः उत्सवाः इति।

(ii) आयुक्षर्योऽस्ति चेत् अन्यत्रगतानामपि मृत्युः भविष्यति एव।

(iii) घनीभूतं हिमं गिरिराजस्य शोभां निरन्तरं वर्धयति।

(iv) अलमिदानीं भवान् अतिमात्रं सन्तप्तुम्।

**अथवा**

**अधोलिखितानां पंक्तीनां सन्दर्भग्रन्थस्य लेखकस्य च नामोल्लेखः क्रियताम्–**

**निम्नलिखित पंक्तियों के संदर्भग्रन्थों और लेखकों के नाम लिखिए।**

**Write the names of the literary works and their authors from where these lines have been taken–**

(i) भागत्रयं भवेदस्य त्रिपुरस्य यथाक्रमक्।

(ii) सूर्यं प्रति पूर्वाभिमुखा पृथिवी 365.25 वारं प्रतिवर्षं भ्रमति।

(iii) नातप्तं लोहं लोहेन सन्धत्ते।

(iv) तस्माद् दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु।

12. **प्रदत्ते भावार्थे रिक्तस्थानपूर्त्तिः क्रियताम्।** **2 × 2 = 4**

**दिए गए भावार्थ में रिक्त स्थान पूर्ति कीजिए।**

**Fill in the blanks in the given explanations.**

**I.** यः मनुष्यः सर्वान् (i)———————— जनान् स्वकीये हृदये पश्यति, सर्वान् (ii)————————पश्यति, सर्वे जनाः (iii)———————— एव, सर्वेषु च स एव (iv)———————— विराजते यःमयि, सः केनापि सह घृणां न करोति।

**II.** यः हिमालयः अनन्तानां (i)————————उद्गमस्थलं वर्तते, (ii)———————— तस्य सौन्दर्यस्य (iii)———————— न भवति। यदि बहवः (iv)———————— सन्ति तेषु एकः दोषः चन्द्रमसः किरणेषु कलंक इव समाप्तप्रायः भवति।

**मञ्जूषा**

| |
|---|
| रत्नानाम्, आत्मनि, हिमं, प्राणिनः, मत्सदृशाः, गुणाः, विनाशकं, आत्मा। |

13. **प्रदत्तश्लोकानाम् अन्वयेषु रिक्तस्थानपूर्त्तिः क्रियताम्–**
**दिए गए श्लोकों के अन्वयों में रिक्तस्थानपूर्ति कीजिए–**
**Fill in the blanks in the prose-order renderings of the given stanzas- 2 + 2 = 4**

**I.** शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः।
जलं जलस्थानगतं च शुष्यति,
हुतं च दत्तं च सदैव तिष्ठति।।

**अन्वयः** कालपर्ययात् ———— क्षयम् गच्छति। सुबद्धमूलाः ———— निपतन्ति। जलस्थानगतम् जलं च ————। हुतं च ———— च सदैव तिष्ठति।

**II.** सत्यं न मे धनविनाशगता विचिन्ता,
भाग्यक्रमेण हि धनानि पुनर्भवन्ति।
एतत्तु मां दहति नष्टधनश्रियो मे,
यत् सौहृदानि सुजने शिथिलीभवन्ति।।

सत्यमेव ———— विचिन्ता मे न (वर्तते), भाग्यक्रमेण ———— धनानि पुनः भवन्ति। एतत् तु माम् ———— यत् नष्टधनश्रियः मे ———— सुजने (सत्यपि) शिथिलीभवन्ति।

14. **प्रदत्तवाक्यांशानाम् सार्थकं संयोजनं कृत्वा पुनः लिखत** **4**
**दिए गए वाक्यांशों को जोड़िए और पुनः लिखिए।**
**Join the following parts of sentences and write them again.**

| | क स्तम्भः | | ख स्तम्भः |
|---|---|---|---|
| (i) | अहिंसया व भूतात्मा | (क) | किम् अस्थाने महान् धनापव्ययः |
| (ii) | अयमेव वत्सरं | (ख) | प्रेक्षकान् प्रसभम् आकर्षतः। |
| (iii) | तिष्ठ तिष्ठ न गन्तव्यम् | (ग) | येषां केषां न ते वन्द्याः |
| (iv) | ते न पश्यन्ति विद्वांसो | (घ) | स्फीता भवन्त्यापदः। |
| (v) | मठानां विशालता भव्यता च | (ङ) | मनः सत्येन शुध्यति। |
| (vi) | करणं परोपकरणं | (च) | तर्हि चतुर्गुणेन सीसेन शोधयेत्। |
| (vii) | निर्वैराः विमुखीमवन्ति सुहृदः | (छ) | द्वादशसु भागेषु विभनक्ति। |
| (viii) | यदि स्र्वणम् अशुद्धं भवेत् | (ज) | देहभंगं कुलक्षयम्। |

15. **प्रसंगानुसारं स्थूलाक्षरपदानाम् अर्थान् लिखत** **1 × 4 = 4**
**प्रसंग के अनुसार मोटे अक्षरों में दिए शब्दों के अर्थ लिखिए।**
**Write the meanings of the words written in bold letters in the following sentences.**

(i) एष एव प्रेयान् **पुण्डरीकपटलस्य।**
(ii) अतः इदानीं **दुर्गसंस्कारः** प्रारब्धव्यः।
(iii) तैः मत्स्यजीविभिः **यद्भविष्येण** सह तत् सरः निर्मत्स्यतां नीतम्।
(iv) स्टाक्पैलेससंग्रहालये **सप्तसप्ततिः** कक्षाः सन्ति। (अंकेषु)

# खण्डः 'घ' (Section 'D')

## भाग–2 (Part–II)

## सामान्यसंस्कृतसाहित्यपरिचयः **10**

## General introduction of Sanskrit Literature

16. अधोलिखितानां कवीनां देश–काल–कृतीनां यथानिर्देशम् नामानि लिखत
    नीचे लिखे कवियों के देश–समय तथा रचनाओं के निर्देशानुसार नाम लिखें
    **Write the names of their place time-creations of the following poets as per instructions.**

अ कवयः

(i) अम्बिादत्तव्यासः
(ii) भासः
(iii) कौटिल्यः
} **देशः**

आ कवयः

(i) कालिदासः
(ii) भर्तृहरिः
(iii) चरकः
} **कालः**

इ कवयः

(i) कालिदासः
(ii) भारविः
(iii) भर्तृहरिः
(iv) भरद्वाजः
} **काचिद् एका कृतिः**

17. अधः मञ्जूषायां प्रदत्तपदैः रिक्तस्थानपूर्तिः क्रियताम् **½ × 10 = 5**
    नीचे मञ्जूषा में दिए गए पदों से खाली स्थान भरें।
    **Fill in the blanks with the words given in the box.**

(i) छन्दोयुक्तरचना————————कथ्यते। पद्यसाहित्यस्य भेदद्वयम् अस्ति महाकाव्यम्———————च।
(ii) 'गद्यं कवीनां निकषं वदन्ति' इति———————महत्त्वं स्पष्टमेव। गद्यकाव्यस्य प्रमुखं भेदद्वयम् अस्ति, कथा———————च।
(iii) 'रघुवंशम्'——————————अस्ति, —————————— च नीतिकथाग्रन्थः।
(iv) नाटकस्य प्रमुखं तत्त्वम्————————अस्ति। नाटकस्य प्रारम्भे 'नान्दी' भवति अन्ते च———————।
(v) 'प्रकरणम्' तु————————एकः भेदः अस्ति। प्रकरणे——————————अंकाः भवन्ति।

**मञ्जूषा**

| |
|---|
| गद्यस्य, पद्यम्, आख्यायिका, खण्डकाव्यम्, अभिनयः, रूपकस्य, महाकाव्यम्, भरतवाक्यम्, दश, हितोपदेशः |

# आदर्शप्रश्नपत्रम्–1 (2006)
## (केन्द्रिकम्) Core
## अंकयोजना Marking Scheme

कक्षा–द्वादश (XII) | कोड संख्या–322
अवधिः होरात्रयम् | पूर्णांकाः 100
**Time : 3 hours** | **Total Marks: 100**

### खण्डः 'क' (Section A)
### अपठितांश–अवबोधनम् **10**

**अस्मिन् खण्डे एकः अनुच्छेदः अस्ति। अस्मिन् 102 शब्दाः सन्ति।**

| क्रमांकः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अंक–संकेतः | अंक–विभागः |
|---|---|---|---|---|---|
| 1. | तथ्यबोध–परीक्षणम् | अतिलघूत्तरः एकपदेन उत्तरम् | (i) समयः | ½ | |
| | | | (ii) समुचितरूपेण | ½ | |
| | | | (iii) समुन्नतेः | ½ | |
| | | | (iv) आलस्यम् | ½ | 2 |
| 2. | तथ्यबोध–परीक्षणम् | लघूत्तरः पूर्णवाक्येन उत्तरम् | (i) अनेके जनाः द्यूते, विवादे, वृथाभ्रमणे, पिशुनतायां, निद्रायां च समस्तं समयं नयन्ति | 1 | |
| | | | (ii) ये जनाः समयस्य दुरुपयोगं न कुर्वन्ति ते सदा सुखेनैव तिष्ठन्ति। | 1 | 2 |
| 3. | भाषिकतत्त्वबोध–परीक्षणम् | अतिलघूत्तरः संज्ञापदचयनम् | 'आयुषः अंशः' इति कृते | 1 | 1 |
| 4. | भाषिकतत्वबोध परीक्षणम् | (i) कर्तृपदचयनम् | (i) दुरुपयोगः | 1 | |
| | | (ii) पर्यायपदचयनम् | (ii) वृथा | 1 | |
| | | (iii) विलोमचयनम् | (iii) दुरुपयोगः | 1 | 3 |
| 5. | शीर्षकप्रदानम् | अतिलघूत्तरः | समयस्य सदुपयोगः अथवा मूल्यवान् समयः अथवा समयस्य महत्त्वम्/उपयोगिता अथवा किमपि अन्यत् | 2 | 2 |
| | | | | | **10** |

## खण्डः 'ख' Section B

**15**

## रचनात्मकं कार्यम् (Writing Skill)

अस्मिन् खण्डे त्रयः प्रश्नाः सन्ति। प्रथमे प्रश्ने लिखिते पत्रे मञ्जूषातः शब्दान् चित्वा विभिन्न–रिक्तस्थानानां पूर्त्तिः करणीया। दश रिक्तस्थानानि सन्ति। (प्रतिशुद्धरिक्तस्थानपूर्तिकृते अर्धः (½) अंकः निर्धारितः।)

| क्रमांकः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अंक–संकेतः | अंक–विभागः |
|---|---|---|---|---|---|
| 2. (i) | पत्रलेखने अनौपचारिककार्य–परीक्षणम् | रिक्तस्थानपूर्त्तिः | (i) मुम्बईतः | ½ | |
| | | | (ii) श्रवण | ½ | |
| | | | (iii) नमस्ते | ½ | |
| | | | (iv) परीक्षापरिणामः | ½ | 2 |
| (ii) | विषयवस्तुबोध–परीक्षणम् | रिक्तस्थानपूर्त्तिः | (v) विदितः | ½ | |
| | | | (vi) अङ्कान् | ½ | |
| | | | (vii) तव | ½ | |
| | | | (viii) आत्मनः | ½ | |
| | | | (ix) वर्धापनम् | ½ | |
| | | | (x) शुभेन्दुः | ½ | 3 |
| 3. | **अस्मिन् प्रश्ने लघुकथायां रिक्तस्थानपूर्त्तिः अपेक्षिता। सहायतार्थं अधः मञ्जूषा दत्ता। (प्रतिशुद्धरिक्तस्थानपूर्त्तिकृते अर्धः (½) अंकः निर्धारितः।)** | | | | **5** |
| | अवबोधपूर्वकम् वाक्यसंरचना–प्रयोगपरीक्षणम् | रिक्तस्थानपूर्त्तिः | (1) सम्राट् | ½ | |
| | | | (2) आदेशेन | ½ | |
| | | | (3) युद्धभूमिम् | ½ | |
| | | | (4) अधिशयानः | ½ | |
| | | | (5) उच्चैः | ½ | |
| | | | (6) सविनयम् | ½ | |
| | | | (7) कुरुसभायाम् | ½ | |
| | | | (8) भवतः | ½ | |
| | | | (9) कलुषिता | ½ | |
| | | | (10) विशुद्धा | ½ | |
| 4. | कमपि एकं विषयम् अवलम्ब्य पंचवाक्यानि लेखनीयानि। अवबोधपूर्वकं वाक्यनिर्माणम् | | | | 5 |
| | | | | | **15** |

## खण्डः 'ग' Section C

## अनुप्रयुक्तव्याकरणम् (Applied Grammar) **30**

अस्मिन् खण्डे भाषायाः तत्त्वानां व्यावहारिकप्रयोगः अपेक्षितः। अस्य आधारः पाठ्यपुस्तकं ऋतिका (भाग–द्वितीयम्) अस्ति।

| क्रमांकः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अंक–संकेतः | अंक–विभागः |
|---|---|---|---|---|---|
| 5. | वाक्येष् सन्धिच्छेद– परीक्षणम् | (i) अनुप्रयोगात्मकः | (i) हि–आप्तकामाः | 1 | |
| | | | (ii) कृतप्रयत्नः+अपि | 1 | |
| | | | (iii) सदा+अनुकूलेषु | 1 | |
| | | | (iv) धनैः अपयशः | 1 | |
| | | | (v) शून्यम् च | 1 | |
| | | | (vi) गेहात् निष्क्रान्तस्य | 1 | **6** |
| 6. | वाक्येषु समस्त–पदानां विग्रहः | अनुप्रयोगात्मकः | (i) अहः च रात्रिः च तम् | 1 | |
| | | | (ii) सुगाङ्गस्य मार्गम् | 1 | |
| | | | (iii) बहवःमत्स्याः यस्मिन् सः | 1 | |
| | | | (iv) सामाजिकं जीवनम् | 1 | |
| | | | (v) सुधां मुञ्चन्ति ताः | 1 | |
| | | | (vi) कूलम् पश्चात् | 1 | **6** |
| 7. | कृदन्ततद्धितप्रत्यानां वाक्येषु प्रत्ययप्रयोग–परीक्षणम् | | (i) विततः | 1 | |
| | | | (ii) आश्रित्य | 1 | |
| | | | (iii) विज्ञापयितुं | 1 | |
| | | | (iv) शुष्यमाणैः | 1 | |
| | | | (v) गन्तव्यम् | 1 | |
| | | | (vi) बलिनः | 1 | |
| | | | (vii) विशालता | 1 | |
| | | | (viii) भगवतः | 1 | **8** |
| 8. | कर्तृक्रिया–अन्वितिः | कर्तृक्रियाप्रयोगः | (i) कुर्मः | 1 | |
| | | | (ii) भवान् | 1 | |
| | | | (iii) वाञ्छथ | 1 | |
| | | | (iv) आदेशय | 1 | |
| | | | (v) यच्छ | 1 | **5** |

| क्रमांकः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अंक–संकेतः | अंक–विभागः |
|---|---|---|---|---|---|
| | | | अथवा | | |
| | विशेषणविशेष्य–अन्वितिः | रिक्तस्थानपूर्तिः | (i) एतत् | 1 | |
| | | | (ii) आनीतानाम् | 1 | |
| | | | (iii) अतिनमितः | 1 | |
| | | | (iv) जीर्णाः | 1 | |
| | | | (v) एतादृशैः | 1 | |
| 9. | उपपदविभक्ति–प्रयोगः | रिक्तस्थानपूर्तिः | (i) अस्माभिः | 1 | |
| | | | (ii) दुर्व्यसनात् | 1 | |
| | | | (iii) विनयेन | 1 | |
| | | | (iv) प्रयोजनम् | 1 | |
| | | | (v) वैतालिकाभ्याम् | 1 | 5 |
| | | | **खण्ड : घ ।** | | |
| 10अ. | गद्यांशबोधः | I एकपदेन उत्तरम् | (i) त्रयः | ½ | |
| | | | (ii) बहुमत्स्यः | ½ | 1 |
| | | II पूर्णवाक्येन उत्तरम् | (i) प्रभाते | 1 | |
| | | | (ii) मत्स्यजीविनाम् | 1 | 2 |
| | | III भाषिकप्रयोगः | (i) मत्स्यजीविश्यः | 1 | |
| | | | (ii) मत्स्यजीविनाम् | 1 | 2 = 5 |
| | | | अथवा | | |
| | | | अनागतविधाता | | |
| 10आ. | पद्यांशबोधः | एकपदेन उत्तरम् | (i) शठाः | ½ | |
| | | | (ii) मायाविषु | ½ | 1 |
| | | पूर्णवाक्येन उत्तरम् | (i) इषुभिः | 1 | |
| | | | (ii) पराभवम् | 1 | 2 |
| | | भाषिककार्यम् | (i) इशवः इति पदस्य | 1 | |
| | | | (ii) असंवृताङ्गान् | 1 | 2 = 5 |
| 10इ. | नाट्यांशबोधः | एकपदेन उत्तरम् | (i) सूत्रधारम् | ½ | |
| | | | (ii) पर्वतात् | ½ | 1 |
| | | पूर्णवाक्येन उत्तरम् | (i) तस्याः उपवासः आसीत् | 1 | |
| | | | (ii) प्रातराशम् | 1 | 2 |
| | | भाषिककार्यम् | (i) नट्याः कृते | 1 | |
| | | | (ii) अनुग्रहः | 1 | 2 = 5 |

| क्रमांकः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अंक–संकेतः | अंक–विभागः |
|---|---|---|---|---|---|
| 11. | अवबोधः | कः कं कथयति | (i) कौटिल्यः–चंद्रगुप्तम् | 1 | |
| | | | (ii) यद्भविष्यः अनागतविधाता–मत्स्यम् | 1 | |
| | | | (iii) शिक्षिका–छात्रान् | 1 | |
| | | | (iv) विदूषकः–चारुदत्तम् | 1 | 4 |
| | | | अथवा | | |
| | संदर्भग्रंथपरिचयः | ग्रन्थनाम | (i) विमानशास्त्रम्–भारद्वाजः | 1 | |
| | | कविर्नाम | (ii) आर्यभटीयम्–आर्यभटः | 1 | |
| | | | (iii) अर्थशास्त्रम्–कौटिल्यः | 1 | |
| | | | (iv) बृहत्संहिता–वराहमिहिरः | 1 | |
| 12. | भावार्थबोधः | रिक्तस्थानपूर्तिः–I | (i) प्राणिनः | ½ | |
| | | | (ii) आत्मनि | ½ | |
| | | | (iii) मत्सदृशाः | ½ | |
| | | | (iv) आत्मा | ½ | 2 |
| | | –II | (i) रत्नानाम् | ½ | |
| | | | (ii) हिमम् | ½ | |
| | | | (iii) विनाशकम् | ½ | |
| | | | (iv) गुणाः | ½ | 2 |
| 13. | अन्वयबोधः | रिक्तस्थानपूर्तिः–I | (i) शिक्षा | | |
| | | | (ii) पादपाः | | |
| | | | (iii) शुष्यति | | |
| | | | (iv) दत्तं | ½×4 | 2 |
| | | –II | (i) धनविनाशगता | | |
| | | | (ii) हि | | |
| | | | (iii) दहति | | |
| | | | (iv) सौहृदानि | ½×4 | 2 |
| 14. | वाक्यमेलनम् | मेलनम् | (i) +ङ | ½ | |
| | | | (ii) +छ, | ½ | |
| | | | (iii) +क | ½ | |
| | | | (iv) +ज | ½ | |
| | | | (v) +ख | ½ | |

| क्रमांकः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अंक–संकेतः | अंक–विभागः |
|---|---|---|---|---|---|
| | | | (vi) +ग | ½ | |
| | | | (vii) +घ | ½ | |
| | | | (viii)+च | ½ | 4 |
| 15. | अर्थबोधः | अर्थलेखनम् | (i) कमलसमूहस्य | 1 | |
| | | | (ii) दुर्गस्य सज्जीकरणम् | 1 | |
| | | | (iii) मत्स्य (नाम) | 1 | |
| | | | (iv) 77 | 1 | 4 |
| | | | | | **35** |

## खण्डः 'घ' Section D

## सामान्यसंस्कृतसाहित्यपरिचयः **10**

## (General Introduction of Sanskrit Literature)

## भाग–2 (Part–II)

| क्रमांकः | उद्देश्यम् | प्रश्न–प्रकारः | अपेक्षित–उत्तराणि | अंक–संकेतः | अंक–विभागः |
|---|---|---|---|---|---|
| 16. | संस्कृतसाहित्य–बोधपरीक्षणम् | रिक्तस्थानपूर्त्तिः | **अ. देशः** | | |
| | | | (i) जयपुर, राजस्थान | 1½ | |
| | | | (ii) अज्ञात | | |
| | | | (iii) मगध | | |
| | | | **आ. कालः** | | |
| | | | (i) ईसापूर्वप्रथमाशताब्दी | 1½ | |
| | | | (ii) षष्ठीशताब्दी | | |
| | | | (iii) ईशवीया द्वितीयशताब्दी | | |
| | | | **इ. कृतिः** | | |
| | | | (i) अभिज्ञानशाकुन्तलम् | 2 | |
| | | | (ii) किरातार्जुनीयम् | | |
| | | | (iii) नीतिशतकम् | | |
| | | | (iv) विमानशास्त्रम् | | **5** |
| घ(II) | गद्यपद्यनाटक–परिभाषाज्ञानपरिचयः | | (i) 1. पद्यम् | ½ | |
| | | | 2. खण्डकाव्यम् | ½ | |
| | | | (ii) 1. गद्यस्य | ½ | |
| | | | 2. आख्यायिका | ½ | |
| | | | (iii) 1. महाकाव्यम् | ½ | |
| | | | 2. हितोपदेशः | ½ | |
| | | | (iv) 1. अभिनयः | ½ | |
| | | | 2. भरतवाक्यम् | ½ | |
| | | | (v) 1. रूपकस्य | ½ | |
| | | | 2. दश | ½ | **5** |
| | | | | | **10** |

## आदर्शप्रश्नपत्रसंख्या–1 (2006)

## पाठ्यक्रमपरिशीलनम्

## (Coverage of Syllabus)

पाठ्यपुस्तकम् ऋतिका भागः 2

### खण्डः 'क' (Section A) 10

### अपठितांश–अवबोधनम्

**1. अपठित–अनुच्छेद : 109 शब्दपरिमितः**

| क्रमांकः | प्रश्न संख्या | विषयः | अङ्काः |
|---|---|---|---|
| | क. 1 | 1. एकपदेन उत्तरम् (चत्वारः प्रश्नाः) | ½ × 4 = 2 |
| | | 2. पूर्णवाक्येन उत्तरम् (द्वौ प्रश्नौ) | 1 × 2 = 2 |
| | | 3. भाषिककार्यम् | |
| | | (i) सर्वनामस्थाने संज्ञाप्रयोगः | 1 × 1 = 1 |
| | | 4. (i) कर्तृपदचयनम् | 1 × 1 = 1 |
| | | (ii) पर्यायपदचयनम् | 1 × 1 = 1 |
| | | (iii) विपरीतार्थकपदचयनम् | 1 × 1 = 1 |
| | | (iv) शीर्षकप्रदानम् | 2 × 1 = 2 |
| | | | **10** |

### खण्डः 'ख' (Section B) 15

### रचनात्मकं कार्यम्

| | | | |
|---|---|---|---|
| | 2 | पत्रलेखनम् (अनौपचारिकपत्रम्) मित्रं प्रति परीक्षायां सफलतायै वर्धापनं दातुम् पत्रमेकम् (रिक्तस्थानपूर्तिमाध्यमेन) | |
| | | औपचारिककार्यपरीक्षणम् | ½ × 4 = 2 |
| | | विषयवस्तुबोधपरीक्षणम् | ½ × 6 = 3 |
| | 3 | लघुकथायाम् शब्दसूचीसाहाय्येन रिक्तस्थानपूर्तिः कथायाम् संदर्भानुकूलं शब्दप्रयोगपरीक्षणम्। | |
| | | प्रतिशुद्ध–पूर्तिकृते अर्धः अंकः। | ½ × 10 = 5 |
| | 4 | एकं विषयम् अधिकृत्य पञ्च वाक्यानि | 1 × 5 = 5 |

| क्रमांकः | प्रश्न संख्या | विषयः | अङ्काः |
|---|---|---|---|

## खण्डः 'ग' (Section C)
## अनुप्रयुक्तव्याकरणम् **30**

| | | |
|---|---|---|
| 5. | संधिविच्छेदः – संधिज्ञानपरीक्षणम्<br>(यण्, विसर्गस्य उ, दीर्घ, विसर्गस्य र्,<br>मकारस्थाने पञ्चमवर्णः) | 6 |
| 6. | वाक्येषु समस्तपदानां विग्रहः।<br>(द्वन्द्वः, षष्ठीतत्पुरुषः, बहुव्रीहिः,<br>कर्मधारयः, उपपदतत्पुरुषः, अव्ययीभावः) | 6 |
| 7. | अनुप्रयोगात्मकरूपेण प्रकृतिप्रत्यय–<br>प्रयोगपरीक्षणम्<br>(क्त, ल्यप्, तुमुन्, तव्यत्, शानच्, इन्, तल्, मतुप्, प्रत्ययाः) | |
| 8. | कर्तृ–क्रियापदयोः परस्परम् अन्वितिः। | 5+3 = 8 |
| | कर्ता–वयम्, भवान् क्रिया–लट्लोट्लकारेषु। | 1×5 = 5 |
| | **अथवा** | |
| | विशेषणविशेष्य–अन्वितिः पञ्चवाक्येषु | |
| 9. | उपपदविभक्तिप्रयोगः (कोष्ठकान्तर्गतशब्देषु)<br>(सह, विरम् योगे, अलम्, अन्तरा, दा योगे) | |

## खण्डः 'घ' (Section D)
## पठितांश–अवबोधनम् (Comprehension of Text)

| **10.अ.** | **गद्यांशः** | **पाठसंख्या** | **अंकाः** | |
|---|---|---|---|---|
| | कस्मिंश्चिद् जलाशये | 4 | 5 | |
| 10.आ. | सुधामुचः वाचः | 6 | 5 | |
| 10.इ. | दारिद्र्ये दुर्लभं सत्त्वम् | 7 | 5 | 15 |
| 11. | (i) राष्ट्रचिन्ता गरीयसी | 3 | 1 | |
| | (ii) दूरदृष्टिः फलप्रदा | 4 | 1 | |
| | (iii) अहो राजते | 5 | 1 | |
| | (iv) दारिद्र्ये | 7 | 1 | 4 |
| | **अथवा** | | | |
| | (i) आश्चर्यमयं विज्ञानम् | 8 | 1 | |
| | (ii) आश्चर्यमयं विज्ञानम् | 8 | 1 | |

| | | | | |
|---|---|---|---|---|
| | (iii) आश्चर्यमयं विज्ञानम् | 8 | 1 | |
| | (iv) आश्चर्यमयं विज्ञानम् | 8 | 1 | 4 |
| 12. | भावार्थे रिक्तस्थानपूर्त्तिः | | | |
| | (i) उत्तिष्ठत जागत | 1 | 2 | |
| | (ii) अहो राजते | 5 | 2 | 4 |
| 13. | अन्वयपूर्त्ति | | | |
| | (i) सुधामुचः वाचः | 6 | 2 | |
| | (ii) दारिद्र्ये | 7 | 2 | 4 |
| 14. | सार्थकसंयोजनम् | | | |
| | (i) उत्तिष्ठत | 1 | ½ | |
| | (ii) सूर्यः एव प्रकृतेः | 2 | ½ | |
| | (iii) राष्ट्रचिन्ता | 3 | ½ | |
| | (iv) दूरदृष्टिः | 4 | ½ | |
| | (v) अहो | 5 | ½ | |
| | (vi) सुधामुचः वाचः | 6 | ½ | |
| | (vii) दारिद्र्ये | 7 | ½ | |
| | (viii) आश्चर्यमयं | 8 | ½ | 4 |
| 15. | शब्दार्थमेलनम् | | | |
| | (i) सूर्यः | 2 | 1 | |
| | (ii) राष्ट्रचिन्ता | 3 | 1 | |
| | (iii) दूरदृष्टिः | 4 | 1 | |
| | (iv) अहो राजते | 5 | 1 | 4 |
| | | | | **35** |

| | | | |
|---|---|---|---|
| 16. | कवीनां देशकालकृतीनां नामानि | | |
| अ. | अम्बिादत्तव्यासः<br>भासः<br>कौटिल्यः | **देशः** | 3 |
| आ. | कालिदासः<br>भर्तृहरिः<br>चरकः | **कालः** | 3 |
| इ | कालिदासः<br>भारविः<br>भर्तृहरिः<br>भारद्वाजः | **कृतिः (काचिदेका)** | 4 |

# आदर्शप्रश्नपत्रम् 2 (2006)
# संस्कृतम् (केन्द्रिकम्)
# (CORE)
# कोड संख्या–322

**अवधिः :** होरात्रयम् — **पूर्णांकाः :** 100
**समय :** तीन घण्टे — **पूर्णाङ्क :** 100
**Time :** 3 hours — **Total Marks :** 100

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
इस प्रश्नपत्र के चार खण्ड हैं।
This question paper has four sections.

| | | | |
|---|---|---|---|
| खण्ड : 'क' | अपठितांश–अवबोधनम् | | 10 अंकाः |
| Section 'A' : | Reading Comprehension | | |
| खण्ड : 'ख' | रचनात्मककार्यम् | | 15 अंकाः |
| Section 'B' : | Writing Skill | | |
| खण्ड : 'ग' | अनुप्रयुक्तव्याकरणम् | | 30 अंकाः |
| Section 'C' : | Applied Grammar | | |
| खण्ड : 'घ' | (i) | पठितांश–अवबोधनम् | 35 अंकाः |
| Section D : | | Text Book | |
| | (ii) | सामान्यसंस्कृतसाहित्यपरिचयः | 10 अंकाः |
| | | General introduction of Sanskrit literature | |

निर्देशाः
**Instructions**

1. उत्तराणि पृथक्–उत्तरपुस्तिकायाम् एव लेखनीयानि।
   Please write the answers in separate answersheet only.
2. सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि।
   Answer all the questions in Sanskrit only.

# आदर्शप्रश्नपत्रम् 2 (2006)
# संस्कृतम् (केन्द्रिकम्)
## (CORE)

**10**

## द्वादश–कक्षा
## Class XII

अवधिः : होरात्रयम् | पूर्णांकाः : 100
समय : तीन घण्टे | पूरे अंक : 100
**Time :** 3 hours | **Total Marks :** 100

## खण्ड : 'क' (Section - A)
## अपठितांश–अवबोधनम्
## (Reading Comprehension)
## (Unseen)

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत** **10**

**नीचे लिखे अनुच्छेद को पढ़कर प्रश्नों के उत्तर दें**

**Answer the following questions based on the passage**

देशस्य भक्तिः देशभक्तिः कथ्यते। देशभक्तिभावनया एव सैनिकाः अन्ये जनाः च देशहिताय स्वप्राणान् अपि त्यक्तुम् इच्छन्ति। कवयः च वदन्ति–जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। लोकानां शरणदायिनी, नानाभोज्यपदार्थप्रदायिनी एषा अस्माकं जन्मभूमिः वीरभूमिः अस्ति।

राष्ट्रसंरक्षणाय परस्परम् एकतायाः भावना अपेक्षिता। नरस्य हृदये राष्ट्रभावना यदि नास्ति तदा तस्य जीवनं निष्फलम् अस्ति। युद्धक्षेत्रे वीराः देशस्य रक्षणार्थं स्वप्राणान् समर्पितवन्तः। यदा सर्वेषु एव देशवासिषु एतादृशी भावना भविष्यति तदा देशः नूनम् उन्नतिं करिष्यति।

यस्य नरस्य हृदयं राष्ट्रप्रेमभावनया भरितं नास्ति तत् हृदयं पाषाणतुल्यम्। अस्माभिः अपि स्वार्थं परित्यज्य देशस्य उन्नतिः देशवासिनां च सेवा करणीया।

**I.** **एकपदेन उत्तरत** **½ × 4 = 2**

**एक शब्द में उत्तर लिखिए**

**Answer in one word only.**

(i) सैनिकाः अन्ये जनाः च देशहिताय किं त्यक्तुम् इच्छन्ति ?

(ii) अस्माकं जन्मभूमिः कीदृशी अस्ति ?

(iii) देशस्य रक्षणार्थम् स्वप्राणान् के समर्पितवन्तः ?

(iv) अस्माभिः किं परित्यज्य देशवासिनां सेवा करणीया ?

**II.** पूर्णवाक्येन उत्तरत **2 × 1 = 2**

पूरे वाक्य में उत्तर दीजिए

**Answer in a complete sentence**

(i) केषां हृदयं पाषाणतुल्यम् अस्ति ?

(ii) राष्ट्रसंरक्षणाय का अपेक्षिता अस्ति ?

**III.** 'अस्माकम्' इति पदं गद्यांशे कस्मै प्रयुक्तम् ? **1**

**IV.** निर्देशानुसारम् उत्तरत **1 ×3 = 3**

निर्देश के अनुसार उत्तर दीजिए

**Do as directed**

(i) इच्छन्ति इति क्रियापदस्य किं कर्तृपदम् ?

(ii) 'अवनतिः' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(iii) 'माता' इत्यर्थे कः शब्दः अत्र प्रयुक्तः ?

**V.** अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत **2**

इस अनुच्छेद का उचित शीर्षक लिखें

**Write an appropriate title of the passage.**

## खण्डः 'ख' Section 'B'

## संस्कृतेन रचनात्मककार्यम् 15

## (Writing Skill)

3. भवान् कनिष्कः। भवान् दिल्लीनगरे वसति। गतवर्षे भवता गणतन्त्रदिवसस्य शोभायात्रायां भागः गृहीतः। स्वानुभवं वर्णयता भवता पञ्चापप्रदेशस्थितं स्वमित्रं प्रति पत्रमेकं लिखितम्। मञ्जूषातः पूरयित्वा उत्तरपुस्तिकायां पत्रं पुनः लिखत।

आप कनिष्क हैं। आप दिल्ली में रहते हैं। पिछले वर्ष आपने गणतन्त्रदिवस की परेड में भाग लिया था। अपने अनुभव का वर्णन करते हुए पंजाब में स्थित अपने एक मित्र को पत्र लिखिए। (मञ्जूषा के शब्दों से भरकर पुनः पत्र उत्तरपुस्तिका में लिखें।)

**You are Kanishka and live in Delhi. Last year you took part in Republic Day Parade. Fill in the blanks [with the words given in the box] in the letter to your friend living in Punjab and narrate your experiences to him. Rewrite the letter in the answersheet. ½ × 10 = 5**

(i)————————

(ii) ———————— निशान्त! तिथिः————————

सप्रेम नमस्ते!

अत्र कुशलं तत्रास्तु। भवतः पत्रं प्राप्य अतिप्रसन्नः अस्मि। भवान् इमं समाचारं ज्ञात्वा प्रसन्नः भविष्यति यत् मया गणतंत्रदिवसस्य शोभायात्रायां भागः गृहीतः। (iii)————————समारोहे अस्माकं विद्यालयस्य एकः वर्गः अपि आसीत्। तस्य वर्गस्य अहं नेता आसम्। एषा भव्या (iv)———————— भारतद्वारतः प्रारभ्य रक्तदुर्गपर्यन्तम् अगच्छत्। राष्ट्रपतेः (v)———————— आगत्य प्रत्येकवर्गस्य नेता अभिवादनम् अकरोत्। तत्र मया अनेकानि नवीनानि शस्त्राणि दृष्टानि। भुशुण्डीम् आदाय सैनिकाः, गृहरक्षकाः छात्राः च राजमार्गे चलन्ति स्म। समारोहेऽस्मिन् विविध–प्रान्तानां (vi)———————— भव्यानि परिदृश्यानि शोभन्ते स्म।

भवतां पञ्चापप्रदेशस्य कलाकाराः हरितक्रान्तिः इति विषये अतीव–आकर्षकं (vii)————————अकुर्वन्। दिल्लीराज्यस्य उद्यानविभागेन निर्मितेन (viii)———————— प्रथमं स्थानं लब्धम्। छात्रैः नृत्यस्य कलायाः च अद्भुतं प्रदर्शनं कृतम्। दर्शकानां करतलध्वनिना निखिलं वातावरणं गुञ्जायमानम् आसीत्। करोमि आशां भवान् अपि स्वनगरे आयोजितस्य गणतन्त्रदिवसस्य वर्णनम् उत्तरे लेखिष्यति। सर्वेभ्यः यथायोग्यम् अभिवादनम्।

भवदीयः सुहृद्

(ix)————————

**वेष्टनम्**

डॉ० करतारसिंह :

110, जालन्धरम्

(x)————————

**मञ्जूषा**

| कनिष्कः, अस्मिन्, दिल्लीतः, समक्षम्, शोभायात्रा, पञ्चापप्रदेशः, सुसज्जितानि, प्रिय, परिदृश्येन, प्रदर्शनम् |
|---|

3. **अधोलिखितैः पदैः वाक्यानि प्रपूर्य कथां पुनः लिखत**

**नीचे लिखे वाक्यों की रिक्तस्थानपूर्ति कर कथा फिर लिखें।**

**Rewrite the story again after filling in the blanks** **½ × 10 = 5**

एकस्य श्रेष्ठिनः (i)————————पुत्राः आसन्। ते चत्वारोऽपि भ्रातरः परस्परं (ii)———————— कुर्वन्ति स्म। तेषां चतुर्णां भ्रातॄणां कलहं दृष्ट्वा सः (iii)————————दुःखी आसीत्। एकदा सः शुष्ककाष्ठानि एकत्रीकृत्य तानि (iv)———————— बद्ध्वा पुत्राणां समक्षम् अस्थापयत्। तान् पुत्रान् अवदत् च– एतानि काष्ठानि त्रोटयत इति। पुत्रेषु एकः अपि तानि (v)————————समर्थः नाभवत्। तदा सः पृथक्कृत्य काष्ठानि पुत्राणां समक्षं पुनः (vi)————————। सर्वे पुत्राः (vii)———————— सर्वाणि काष्ठानि अत्रोटयन्। सः (viii)————————अकथयत्–इत्थमेव यूयमपि चेत् परस्परं मिलित्वा (ix)———————— तर्हि कोऽपि युष्मान् हन्तुं समर्थः न भविष्यति। यतो हि (x)———————— शक्तिः कलौ युगे।

**मञ्जूषा**

| निवत्स्यथ, चत्वारः, श्रेष्ठी, त्रोटयितुम्, कलहम्, संघे, अस्थापयत्, रज्ज्वा, पुत्रान्, सरलतया |
|---|

4. अधोलिखितेषु एकं विषयम् अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदम् लिखत। **1 × 5 = 5**
नीचे लिखे विषयों में से एक पर पांच वाक्यों का एक अनुच्छेद लिखें।
**Write a passage of five Sanskrit sentences on any one of the following topics.**
(i) मम माता
(ii) मम वाटिका
(iii) मम संस्कृतपुस्तकम्

## खण्डः 'ग' Section 'C'

## अनुप्रयुक्तव्याकरणम् 30
## (Applied Grammar)

5. अधोलिखितवाक्येषु स्थूलाक्षरपदानां सन्धिविच्छेदः क्रियताम्। **1 × 6 = 6**
नीचे लिखे वाक्यों में स्थूलाक्षरपदों में सन्धिविच्छेद कीजिए।
**Disjoin Sandhis in the bold typed words in the following sentences.**
(i) अहं पर्वतात् दूरमारोप्य **पातितोऽस्मि**।
(ii) द्यौः **शान्तिरन्तरिक्षम्**।
(iii) **निमज्जतीन्दोः** किरणेष्विवाङ्कः।
(iv) किं **वाङ्मात्रेण** अपि एतत् सरःत्यक्तुं युज्यते।
(v) **निघर्षणच्छेदनतापताडनैः**।
(vi) येन **आक्रमन्त्यृषयो** हि आप्तकामाः।

6. अधोलिखिवाक्येषु स्थूलाक्षरपदानां विग्रहाः लेखनीयाः **1 × 6 = 6**
निम्नलिखित वाक्यों में मोटे अक्षरों में छपे पदों के विग्रह लिखिए–
**Disjoin compounds in the bold words in the following sentences–**
